॥ श्रीगुरुभ्यो नमः ॥

श्रीकांचीकामकोटिपीठाधिपतिजगद्गुरु श्रीचंद्रशेखरेंद्रसरस्वती स्वामिनां श्रीचरणेषु विक्रमसांवत्सरिकशरन्नवरात्रसमये समर्पितं

श्लोकपंचकम् ।

एकाम्रनाथवरदेश्वरसन्निकर्षात् ।
या मोक्षपूः प्रथयतीव शिवाच्युतैक्यं ॥
कांचीमधिश्रितवतीं भवरोगहर्त्रीं ।
श्रीचक्रराजनिलयां शरणं व्रजामि ॥ १ ॥

नम्रसुरासुरसिद्धमहोरगचारणकिन्नरयक्षकिरीट- ।
प्रज्वलमानमहामणिभास्करकोटिमरीचिसमावृतपादाम् ॥
पादसरोरुहरेणुनिवारितभक्तभयां वरदां शिवकांताम् ।
नौमि मयूरगतिप्रियमातरमिंदुधरां भवसागरनौकाम् ॥ २ ॥

नास्तिक्यांधतमोरविः कलिहराद्वैताब्धिजैवातृकः ।
नित्यानंदगवेषणार्तसुरभूजस्सर्वविद्याबुधः ॥
दृष्टादृष्टजगद्गुरुर्द्रुहिणसूत्राभीष्टदर्शी कविः ।
दुर्वादाष्टमगार्कजो विजयते ज्ञानाकरश्शंकरः ॥ ३ ॥

कांचीपीठाधिरूढास्सकलनिगमसच्छास्त्रसिद्धान्तविज्ञाः ।
संदेहाग्निप्रदग्धान् निजवचनसुधासेचनाज्जीवयंतः ॥
सर्वान्देशांश्चरन्तो निखिलकुमतजालान्विभिद्याधुना ये ।
स्वर्णारण्ये भवानीगिरिशपदसरोजार्चनासक्तचित्ताः ॥ ४ ॥

नौमि भक्तजनकल्पमहीरुहान् ।
चंद्रशेखरयमींद्रसरस्वतीः ॥
ऐहिकाहिविषतापनिवारकाऽ ।
द्वैतवारिधिनिमज्जनकोविदान् ॥ ५ ॥

विक्रमाश्विनशुक्लदशमी
पुण्यनगरी

गुरुचरणसरोरुहभृंगः
गर्गेश्वरी वेंकटसुब्बशर्मा
(एम्. ए., बि. टि., ए. आय्. ए.)

आयुर्विद्या मुद्रणालयं, पुण्यपत्तनम्.